International Journal of Sanskrit Research 2021; 7(6): 237-240

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 237-240
© 2021 IJSR
www.anantaajournal.com
Received: 20-09-2021
Accepted: 27-10-2021

**भवेशमण्डलः**
शोधच्छात्रः, कलिकाताविश्विद्यालयस्य,
वेस्ट बंगाल, भारत

**Corresponding Author:**
**भवेशमण्डलः**
शोधच्छात्रः, कलिकाताविश्विद्यालयस्य,
वेस्ट बंगाल, भारत

# गोपालतापनीदिशा श्रीकृष्णस्य परब्रह्मत्वम्

**भवेशमण्डलः**

**प्रस्तावनाः**

इयं तापनी वैष्णवोपनिषत् अथर्ववेदीया। अत इयम् आथर्वणोपनिषत् इत्युच्यते। गुर्जरस्य निकटस्थे देशे पराशरगोत्रसम्भूतवेदज्ञब्राह्मणसम्प्रदायेषु अस्याः श्रुतेः समालोचना दृश्यते। गोपालतापन्याः प्रख्यातटीकाकारो जीवगोस्वामी तस्य टीकायामुवाच - 'गुर्जरादिदेशप्रसिद्धपराशरगोत्रादिब्राह्मणसम्प्रदायप्राप्ताथर्ववेदस्थपिप्ललाद-शाखादिपठिता श्रीगोपालतापन्याख्या श्रुतिरियम्'[1] इति।

विश्वनाथचक्रवर्तिभाषया –

'गुर्जरादिदेशप्रसिद्धपराशरगोत्रब्राह्मणसम्प्रदाय-प्राप्ताथर्ववेदस्य पिप्पलादशाखापठितश्रीगोपालतापन्याख्या श्रुतिः'[2] इति।

गोपालतापनीटीकाकारस्य बलदेवविद्याभूषणस्य मतेन –

'औत्कलादिभिराथर्वर्णिकैरधीयमाना पिप्पलादिशाखान्तस्थितेयं गोपालोपनिषत्..'[3] इति।

एतौ अस्यां यशोदातनयः श्रीकृष्ण एव परं ब्रह्मेति प्रतिपादितमस्ति। अत इयं श्रुतिः भवबन्धनमोचिनी। भगवान् कृष्ण एव सर्वेश्वरः, स एव ज्ञानं, तेजः, शक्तिः, बलम्, ऐश्वर्यं, वीर्यञ्चेति षडैश्वर्यशालिनी। श्रीकृष्णस्य प्रवृत्तिः अनादिकालतः स्वतन्त्रतया आर्षविज्ञान-विषयीभूतेन केनचिदपि अपरशाकेन अप्रतिहतः। सकलविश्वकार्यस्यारम्भः तस्मिन्नेव शाके निमज्जितः। विश्वकार्यं तस्य मायाया लीला। भगवल्लीलैव कारुण्यविलासश्च तस्यैव स्वरूपशक्तेः कार्याणि। एवम् उपादेयविषया अस्यास्तापन्या एवावगम्यन्ते।

श्रुतेर्नाम गोपालतापनी। को गोपालः? यो गोपान् जीवसमूहान् वात्मरूपेण आसृष्टि अङ्गीकरोति स गोपालः। तथा च श्रुतिः - 'यो गोपानन् जीवान् वै आत्मत्वेनासृष्टि-पर्यन्तमालाति स गोपालो भवतीति'[4] इति। गोपालोऽयं पर आत्मा श्रीकृष्णः। गोपल एष परमात्मत्वेनास्यां श्रुतौ प्रतिपादितोऽस्ति। अतः तापनीयं गोपालतापनीति अभिहिता। अत्र 'तापनी'शब्देन श्रुतिरेवावगन्तव्या। तथा च तापनीव्याख्याकारो विश्वेश्वरः - 'श्रीगोपालविद्यामुद्दीपयन्ती तापनी श्रुतिः'[5] इति। टीकाकारो जीवोऽपि तापन्या श्रुतिमेवावगमितवान् - 'गोपालतापनाख्या श्रुतिरियम्'[6]। श्रुतिरूपेयं तापनी उपनिषत्पद-वाच्या तथा मतिर्विश्वेश्वरस्य 'उपनिषच्छब्दवाच्यत्वादपि तापन्य विषयप्रयोजनादिकं सूचितम्'[7]।

उपनिषदोऽस्याः प्रतिपाद्यो विषयः - 'गोपालविद्या' 'गोपालब्रह्मविद्या' वा। अर्थात् प्रसङ्गत उल्लेख्यं यत् उपनिषदि प्रतिपाद्यं केवलं ब्रह्मविद्या। अनेन ब्रह्मविद्यापरायणो जनः अविद्याप्रसूतसंसारबन्धनात् प्रमुच्यते। किम्वा, ब्रह्मविद्यानुशीलनरतानां जीवानां जन्मजरारोगादीन् नष्ट्वा विद्येयं मुक्तिं प्रापयति तानियं विद्या। तथा इयं गोपालतापनीप्रतिपादिता गोपालविद्या जन्माद्यनर्थसमूहान्

---

[1] श्रीश्रीगोपालतापनीटीका – १, श्रीसुखबोधिनीटीका

[2] गोपालपूर्वतापनी - १, तापनीविवृतिः

[3] गोपालपूर्वतापनी – १, तापनीभाष्यम्.

[4] गोपालोत्तरतापनी – ४४

[5] गोपालपूर्वतापनीयोपनिषत् – १, अर्थबोधनीटीका

[6] गोपालपूर्वतापनीयोपनिषत् – १, श्रीसुखबोधिनी

[7] गोपालपूर्वतापनी – १, अर्थबोधनीटीका, पृष्ठा. - ७

विनश्य मुमुक्षून् संसारनिवर्त्तकं परं ब्रह्मपदं प्रापयति तथा संसारहेतुभूतामविद्यामपि नाशयति। एतदध्येव कारणात् इयमपि गोपालविद्या उपनिषत्पदवाच्येति। तथा च टीकाकारो विश्वेश्वरः - 'तया हि ये इमां गोपालविद्यामुपयान्ति मुमुक्षवस्तेषामियं गोपालविद्या गर्भजन्मजरारोगाद्यनर्थव्रातं शातयति तथा कृष्णाख्यं संसारविनिवर्त्तकं परं ब्रह्म गमयति। संसार-हेत्वविद्यादिकञ्चात्यन्तमवसादयति विनाशयतीति व्युत्पत्त्या गोपालविद्या उपनिषदुच्यते'[8] इति। 'आयुर्वै घृतम्', 'लाङ्गलं जीवनम्' इति न्यायेन गोपालविद्याप्रतिपादको ग्रन्थोऽपि उपनिषत् इति प्रोच्यते। अतो गोपालविद्येव उपनिषदो मुख्यार्थः, गौणार्थश्च तत्प्रतिपादको ग्रन्थः। तथा च विश्वेश्वरः - 'एतद्धेतुत्वाच्च ग्रन्थोऽपि उपनिषदित्युच्यते। आयुर्वै घृतम् इत्यादिवत्'[9] इति।

गोपालतापन्यामिदं सर्वव्यापकं ब्रह्मैव कृष्णत्वेन प्रतिपादितम्। नराकृतिः भगवान् कृष्ण एवास्याः श्रुतेः प्रतिपाद्यः। स एव सच्चिदानन्दः, परं ब्रह्म, सर्ववेदान्तवेद्यः। तापन्या माङ्गलिके श्लोके अत उक्तमस्ति –

''ओं सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे॥''[10]

अर्थात् 'सत्', 'चित्', 'आनन्दः' इति प्रातिपदिकत्रयं मिलितरूपमेव कृष्णः। सदिति ब्रह्म 'सनातनसत्ता' 'सत्स्वरूपम्' वेति। चित् इति चैतन्यं ज्ञानं वा। आनन्द इत्यादिना तत् आनन्दस्वरूपमिति कथ्यते। अत्र सत् इत्यस्यार्थः अनसत्। चिदिति अस्यार्थो न तावत् स्थावरमिति। आनन्द इति अस्यार्थो न तावत् निरानन्दमिति। अतः स एव कृष्णः 'सच्चिदानन्दस्वरूपः' इति। तथा च श्रुतिः - 'गोविन्दं सच्चिदानन्दविग्रहम्'[11]। ब्रह्मणः सच्चिदानन्दत्वे श्रुतिरपरा –

'सत्यं ज्ञानमनन्तं ब्रह्म'[12]।

'सच्चिदानन्दरूपं तदवाङ्मनसगोचरम्'[13]।

अपि च स्मृतिः –

'सत्यं ज्ञानमनन्तं यद्ब्रह्म ज्योतिः सनातनम्'[14]।
''परमात्मा परानन्दः सर्वोपाधिविवर्जितः।
ज्ञानैकवेद्यः परमः सच्चिदानन्दविग्रहः॥''[15]
'ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः'[16]।

यत् सर्वं व्याप्य वर्तते, तदेव सत्यस्वरूपं सत् इति। तदन्यत् असदिति। अस्-धातोः सत् अस्ति चेति आगते। अस्-धातोरर्थः विद्यमानता। यदस्ति तदेव सत् तदेव नित्यम्। कालत्रितयव्यापि एव सत्। यत् पुनः अचिरस्थायि तदसत्। यत् सत्, न तत् अभावयुक्तम्। तथा च गीता - 'नाभावो विद्यते सतः'[17]। यत् पूर्वमेवासीत्, अधुना वर्तते, परकालेऽपि स्थास्यति तदेव सदिति। अतः सत् कालत्रितयेऽपि सत्यं - 'सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितञ्च सत्ये'[18]। असतः त्रैकालिकास्तित्वं नास्ति। अतः अस्तित्वभावविरहितं तत् - 'नासतो विद्यते भावः'[19]। अतः सत् अस्ति वा इति लक्षणेन परं सत्यमेव लक्ष्यते। कुतः तद्विना नास्ति इतरपारमार्थिकसत्ता। अतो ब्रह्म श्रीकृष्ण एव शाश्वतः, अनादिः, अनन्तश्च। स एव जन्मवृद्धिक्षयमृत्यादिरहितः। तथा च तापन्यां - 'जन्मजराभ्यां भिन्नः स्थाणुरयमुच्छेद्योऽयं योऽसौ सौर्ये तिष्ठतीति'[20]।

[8] तत्रैव, पृ. – ६-७
[9] तत्रैव, पृ. - ६
[10] गोपालपूर्वतापनीयोपनिषत् – १/१
[11] गोपालपूर्वतापनीयोपनिषत् – ५/५
[12] तैत्तिरीयोपनिषत्
[13] रुद्रहृदयोपनिषत् - २६
[14] भागवतमहापुराणम् – १०/२८/१५
[15] बृहन्नारदीयपुराणम् – ३/२१
[16] ब्रह्मसंहिता – ५/१
[17] श्रीमद्भगवद्गीता – २/१६
[18] भागवतमहापुराणम् – १०/२०/२६
[19] श्रीमद्भगवद्गीता – २/१६
[20] गोपालोत्तरतापनी - २३

सत् अर्थात्, देशकालपरिच्छिन्नम्। चित् इति स्वप्रकाशः, आनन्दः पुनः सुखस्वरूपः। गोपालतापन्याः टीकाकारः जीवगोस्वामी सच्चिदानन्दव्याख्यानप्रसङ्गे उवाच - 'सत् कालदेशाद्यपरिच्छिन्नं चित् स्वप्रकाशम् आनन्दश्चातुल्यातिशयसुखम्'[21]। श्रीकृष्णः ज्ञानस्वरूपः अर्थात् चित् चैतन्यं ज्ञानं वा। स्वप्रकाशः वा पुनः। एषः कृष्ण एव ज्ञानस्वरूप इति प्रसङ्गे स्वयं श्रुतिः कथितवती - 'सत्तामात्रं विश्वरूपं प्रकाशं व्यापकं तथा'[22]। ब्रह्मणः ज्ञानस्वरूपत्वे श्रुतिरपरा –

'तस्य भासा सर्वमिदं विभाति'[23]।
'तदेव ज्योतिषां ज्योतिः'[24]।

अपि च भागवतमहापुराणे - 'ब्रह्म ज्योतिर्निर्गुणं निर्विकारम्। सत्तामात्रं निर्विशेषं सत्त्वं साक्षाद्विष्णुरध्यात्मदीपः'[25]।

परब्रह्म कृष्ण एवानन्दस्वरूपः। अर्थात् स एव सत्यस्वरूपः, स एव ज्ञानमयः, स एवानन्दस्वरूपः। आनन्दस्वरूपत्वाज्जीवाः पुनरानन्दयुक्ता वर्तन्ते। अर्थात् स एव जीवानां परमानन्दहेतुकः। तस्यानन्दस्वरूपत्वे कृष्णस्य तापनी कथयति - **'परं ब्रह्म** कृष्णात्मनो नित्यानन्दैकरूपः'[26], 'गोविन्द परमानन्द'[27], 'प्रसीद परमानन्द प्रसीद परमेश्वर'[28], 'नमो विज्ञानरूपाय परमानन्दरूपिणे कृष्णाय गोपीनाथाय गोविन्दाय नमो नमः'[29]।

कृष्णस्यानन्दस्वरूपत्वेऽन्याः श्रुतयः - 'विज्ञानमानन्दं ब्रह्म'[30], 'आनन्दो ब्रह्मेति व्यजानात्'[31]। स्मृतिप्रमाणं - 'गोविन्दं परमानन्दमेकमक्षरमच्युतम्'[32], 'केवलानुभवानन्दस्वरूपः परमेश्वरः'[33]।

अतो भगवता गोविन्दस्य सच्चिदानन्दरूपत्वम्, 'अस्ति' अर्थे सत्, अर्थात् सत्तावान् तथा 'भाति' इत्यर्थे प्रकाशश्चैतन्यं वा, यतः चैतन्यमेव स्वप्रकाशम्। पुनः 'प्रियमि'ति आनन्दस्वरूपम्। अतः श्रुतिः –

''अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्॥''[34]

परिशेषे उच्यते परब्रह्मणः कृष्णस्य यो द्विभुजो विग्रहो नैव प्रकृतः, स 'सच्चिदानन्दविग्रहः' इति शब्देनोच्यते। अर्थात् तस्य देहो विग्रहो वा सच्चिदानन्दघनः, चिद्घनः अर्थात् विज्ञानघनः। अतो भगवतः सर्वे करचरणादय आनन्दघनो विज्ञानघनः। अतस्तापन्यां 'विज्ञानानन्दघनसच्चिदानन्दैकरसे भक्तियोगे तिष्ठतीति'[35]। अतः स एव विज्ञानघनः सच्चिदानन्दस्वरूप इत्येव तापन्यां तात्पर्यम्। तदेव कृष्णरूपि परं ब्रह्म एकमेवाद्वितीयम्। तथा च तापनी - 'एकमेवाद्वितीयं ब्रह्म'[36]। वासुदेवोपनिषदि अस्ति - 'अद्वयं ब्रह्म'[37], तापन्यां स्पष्टीभूतमासीत् कृष्णरूपिणो ब्रह्मणः अद्वितीयत्वम् 'अद्वितीयाय महते श्रीकृष्णाय नमो नमः'[38]। 'एको वशी सर्वगः कृष्ण ईड्यः'[39]। 'सदेव सौम्य इगमग्र आसीदेकमेवाद्वितीयम्'[40] इति

[21] गोपालपूर्वतापनीयोपनिषत् – १, श्रीसुखबोधिनीटीका
[22] गोपालोत्तरतापनीयोपनिषत् - ५४
[23] कठोपनिषत् – ४/१५
[24] बृहदारण्यकोपनिषत् – ४/४/१६
[25] भागवतमहापुराणम् – १०/३/२१
[26] गोपालोत्तरतापनीयोपनिषत् - ४४
[27] गोपालपूर्वतापनी – ५/१७
[28] तत्रैव – ५/१५
[29] तत्रैव – ५/७
[30] बृहदारण्यकोपनिषत् – ३/९/२८
[31] तैत्तिरीयोपनिषत् – ३/६/१
[32] ब्रह्मवैवर्तपुराणम्, ब्रह्मखण्डः – ३/४४
[33] भागवतमहापुराणम् – ७/६/२३
[34] सरस्वतीरहस्योपनिषत् - २४
[35] गोपालोत्तरतापनीयोपनिषत् – ७९
[36] तत्रैव - ५४
[37] वासुदेवोपनिषत् - १५
[38] गोपालपूर्वतापनीयोपनिषत् – ५/१४
[39] तत्रैव – २/८

छान्दोग्योपनिषद्। तदेव कृष्णरूपिपरमब्रह्मणः स्वगतादिभेदरहितम् अर्थात् अद्वितीयम्। तस्याद्वितीयत्वे स्मृतिरुवाच –

''वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः।
वृक्षान्तरात् सजातीयो विजातीयः शिलादितः॥''[41]

गोपालतापनीटीकाकारः श्रीविश्वेश्वराचार्य उवाच - 'पूर्वं सृष्टेः प्राक् एकं सजातीयभेदरहितमेव शब्दात् स्वगतभेदरहितम् अद्वितीयं विजातीयभेदरहितं ब्रह्म आसीत्। तस्मात् ब्रह्मणः अव्यक्तं सर्वकार्यकारणशक्तिं अव्यक्तम् आसीत्..... एकमेवाद्वितीयं ब्रह्म'[42]। अतः परमब्रह्मरूपी कृष्ण एक एव। न तस्यास्ति कोऽपि भेद इत्येव तापन्या अभिप्रायः।
कृष्णस्य परब्रह्मत्वं तापन्यामुक्तमस्ति। यत्र सनकादिमुनीनां - 'कस्य विज्ञानेऽखिलं विज्ञातं भाति'[43]। प्रश्नस्योत्तरे प्रजापतिरुवाच - 'गोपीजनवल्लभज्ञानेन तज्ज्ञातं भवतीति'[44]। अर्थात् गोपीजनवल्लभकृष्णस्य ज्ञानेनैव सर्वं ज्ञातं भवतीति। एष एव गोपीजनवल्लभो जगतां सृष्टिस्थितिलयकारणम्। तथा च तापनी –

''नमो विज्ञानरूपाय विश्वरूपाय विश्वस्थित्यन्तहेतवे।
विश्वेश्वराय विश्वाय गोविन्दाय नमो नमः॥''[45]

अतः परब्रह्मकृष्णज्ञानादेव विश्वं प्रकाशते। मृत्पिण्डखण्डैकज्ञानान्मृतिका-ज्ञानमिव कृष्णज्ञानादेव विश्वज्ञानमिति भावः। तथा च श्रुतिः - 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'[46]।
श्रीविश्वेश्वराचार्यः कृष्णस्य परब्रह्मत्वमनेन प्रकारेण व्याख्यातवान् - 'गोपीजनेति इदं सकलजगत् नामरूपाभ्यां गोपायति रक्षति अथवा परं पुमांसं परब्रह्मस्वरूपं गोपायति संवृणोतीति व्युत्पत्त्या गोपीप्रकृतिर्माया तस्याः सकाशाज्जातः प्रपञ्चो गोपीजनः तस्य वल्लभः स्वामी ईश्वरः उत्पादनपालसंहरणाधानम् इत्यधिष्ठानत्वात् तद्विज्ञानेन तत् अखिलं विश्वं विज्ञानं भवति। यथा एकेन मृत्पिण्डेन अखिलं मृन्मयं विज्ञातं भवतीति श्रुतिस्मृतीतिहासलोकेषु प्रसिद्धेः'[47]। तापन्यां पुनरुक्तमस्ति कृष्णस्य परब्रह्मत्वम्। अस्माद्बिभेति परब्रह्मणः कृष्णान्मृत्युः - 'गोविन्दान्मृत्युर्बिभेति'[48]। तस्य लाभादेव साधकस्यामृतत्वलाभ इति। गो अर्थात् ज्ञानेन लाभात् स गोविन्द इति। सुतरां परब्रह्मणः कृष्णस्य लाभादेव मुमुक्षूणाममृतत्वलाभो भवति - 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय'[49]। अस्यैव सविधे मृत्युरपि आज्ञायाचीति। अस्माद्भीताः सन्त इन्द्रियादयः स्वीयस्वीयकार्येषु प्रवर्तिता भवन्ति। तथा च श्रुतिः –

''भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः।
भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः॥''[50]

कठोपनिषदि अस्ति –

''भयदेस्याग्निस्तपति भयात् तपति सूर्यः।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः॥''[51]

गोपालकृष्ण एवाक्षरात्मकं ब्रह्म अर्थात् स एवाव्यक्ताक्षररूपी ओंकारः। एष कृष्ण एवाजरः, अमरः, अभयः, अमृतश्चेति। एषः अध्याकृतम् अक्षरम्, अभयरूपि ब्रह्म अविद्यारहितं तथा अविद्यानाशि। तथा च तापनी - 'अक्षरोऽहमोङ्कारोऽहमजरोऽमरोऽभयोऽमृतो ब्रह्माभयं हि वै स मुक्तोऽहमस्मि अक्षरोऽहमस्मि'[52]। अतस्तापन्याम् ऋषिर्दुर्वासाः प्रणवस्य ओंकारस्य चार्थप्रकाशद्वारा कृष्णस्य ब्रह्मत्वं प्रतिपादितवान् - 'चतुःशब्दो भवेदेको ह्योङ्कारः समुदाहृतः'[53]। अर्थात् अकारः, उकारः, मकारस्तथा अर्धचन्द्राकृतिः चेति चत्वारो वर्णवाचकाः रामः, प्रद्युम्नः, अनिरुद्धः, श्रीकृष्ण इति चतुर्व्यूह एव ओंकाररूपं ब्रह्म। तथा च माण्डूक्योपनिषदि - 'सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति'[54]। तापन्यामस्ति अक्षरात्मकं ब्रह्म ओंकारस्य अकारादाविर्बभूव बलरामः। स एव रामो विश्वात्मकजाग्रतावस्थाया अधिष्ठाता। ओंकारस्य उकारात् प्रद्युम्नः प्रादुर्बभूव। स तैजसात्मकं अर्थात् स्वप्नावस्थायामधिष्ठातृरूपी। ओंकारस्य मकारात् अनिरुद्ध उत्पन्नोऽभवत्। स एव प्राज्ञः सुषुप्त्यधिष्ठातृरूपी। परन्तु कृष्ण एवावस्थात्रयविवर्जितस्तुरीयः पदार्थः, स एवार्धमात्रास्वरूपः, तस्मिन्नेव विश्वं प्रतिष्ठितं वर्तते। अर्थात् अर्धमात्रात्मकश्रीकृष्ण जाग्रदाद्यवस्थात्रयातीतस्तुरीयो मृत्युवर्जितः अवस्थास्वरूपः। एषः अनन्तो ब्रह्माण्डः। केवलं श्रीकृष्ण एव प्रतिष्ठितोऽस्ति। तथा च तापनी –

''रोहिनीतनयो रामो अकाराक्षरसम्भवः।
तैजसात्मकः प्रद्युम्न उकाराक्षरसम्भवः॥
प्रज्ञात्मकोऽनिरुद्धो वै मकाराक्षरसम्भवः।
अर्द्धमात्रात्मकः कृष्णो यस्मिन् विश्वं प्रतिष्ठितम्॥''[55]

श्रीकृष्णस्य परब्रह्मत्वं श्रुत्यन्तरेऽप्यस्ति - 'कृष्णो ब्रह्मैव शाश्वतम्'[56]। तथा च नारायणोपनिषदि - 'तदिदं पुण्डरीकं विज्ञानघननम्..... ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः। ब्रह्मण्यो पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युत इति। सर्वभूतस्थमेकं वै नारायणं कारणपुरुषकारणं परं ब्रह्म'[57]। अर्थात् कृष्णरूपि ब्रह्म जगत्कारणं, सर्वात्मकं, स एव देवकीपुत्रः। नारायणः, मधुसूदनः, पुण्डरीकाक्षः, विष्णुः, अच्युतश्चेति कृष्णस्यैवाभिधान-वैचित्र्यम्। कृष्णस्य ब्रह्मत्वे वासुदेवोपनिषत् –

''मद्रूपमद्वयं ब्रह्म आदिर्मध्यान्तविवर्जितम्।
स्वप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम्॥''[58]

त्रिपाद्विभूतिमहानारायणोपनिषद्यस्ति –

''देवकीसुत गोविन्द वासुदेव जगत्पते।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥

श्रीमन्नारायणो ज्योतिरात्मा नारायणः परः।
नारायणपरं ब्रह्म नारायण नमोऽस्तु ते॥''[59]

अत्र नारायणः कृष्ण एव ज्योतिःस्वरूपः, स एव परः। अतो देवकीसुतः कृष्णो वासुदेव एव ब्रह्मेति प्रतिपाद्यते। महाभारतदिशा स एव शाश्वतं परं ब्रह्म –

''यत्तदक्षरमव्यक्तममृतं ब्रह्म शाश्वतम्।
वदन्ति पुरुषव्याघ्र केशवं पुरुषर्षभम्॥''[60]

---

[40] छान्दोग्योपनिषत् – ६/२/१
[41] पञ्चदशी– २/२०
[42] गोपालोत्तरतापनीयोपनिषत् – ५४, अर्थबोधनीटीका
[43] गोपालपूर्वतापनीयोपनिषत् – १/२
[44] तत्रैव – १/५
[45] तत्रैव – ५/६
[46] छान्दोग्योपनिषत् – ६/१०/४
[47] गोपालोत्तरतापनीयोपनिषत् – १/५, अर्थबोधनीटीका
[48] गोपालपूर्वतापनीयोपनिषत् – १/४
[49] श्वेताश्वतरोपनिषत् – १/६
[50] तैत्तिरीयोपनिषत् – २/८/१
[51] कठोपनिषत् – २/३/३
[52] गोपालोत्तरतापनीयोपनिषत् - ५४
[53] तत्रैव - ४१
[54] माण्डुक्योपनिषत् - ८
[55] गोपालपूर्वतापनीयोपनिषत् – ५५-५६
[56] कृष्णोपनिषत् - १२
[57] नारायणोपनिषत् - ४
[58] वासुदेवोपनिषत् - १६
[59] त्रिपाद्विभूतिमहानारायणोपनिषत् – ७/४०-४३
[60] महाभारतम्, शान्तिपर्व – ७/१४

नराकृतिपरब्रह्म श्रीकृष्ण एव तत्तु पुराणादावस्ति –

''यदोर्वंशः नरः श्रुत्वा सर्वपापैः प्रमुच्यते।
यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म नराकृति।।''[61]

अर्थात् श्रीकृष्णनाम्नः परब्रह्मणः निराकारस्यैवावताररूपेणाविर्भावः। अस्यैव कथाश्रवणाच्छ्रोतारः सर्वपापेभ्यो मुच्यन्ते इति। पद्मपुराणस्योत्तरे खण्डे नराकृतिकृष्णस्यैव कीर्तनं क्रियते। यतः स एव वृष्णिवंशे आविर्बभूव। अतः स एव परमं ब्रह्म –

''वार्ष्णेय सात्वतां श्रेष्ठः शौरिर्षदुकुलेश्वरः।
नराकृति परं ब्रह्म सव्यसाचि वरप्रदः।।''[62]

भागवतपुराणेऽस्ति यत्, असीमानन्दाधिकारिणो नन्दगोपा अन्ये व्रजवासिनश्चेति यतः परमानन्दस्य कृष्णस्य पूर्णब्रह्मण एवात्मीयत्वेनाविर्भाव इति –

''अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम्।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्।।''[63]

तस्यैव पुराणस्य सप्तमस्कन्धे कृष्णस्य परब्रह्मत्वं प्रतिपादितमासीत् - 'श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः'[64]। दशमेऽस्ति विष्णुदेवः, श्रीकृष्णो वा अव्यक्तः, सर्वकारणम्, परब्रह्म, ज्योतिःस्वरूपः, निर्गुणः, अविकारः, सत्तामात्रम्, निर्विशेषः, निष्क्रिय एव च। अतः कृष्ण एव नराकृतिपरब्रह्म –

''रूपं यत्तत् प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणनिर्विकारम्।
सत्तामात्रं निर्विशेषं निरीहं सत्त्वं साक्षाद् विष्णुरध्यात्मदीपः।।''[65]

गीतायां स्वयं श्रीकृष्णः अर्जुनमुवाच यत् – अविनाशिब्रह्म, अमृतमयम्, तथा ऐकान्तिकसुखाश्रयः। तत् सर्वमेवाहमिति –

''ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च।।''[66]

तस्या एव गीताया द्वादशाध्यायेऽस्ति – कृष्ण एव परमब्रह्म, परं धाम, पवित्रं, शाश्वतः पुरुषः, दिव्यः, अजः, तथा विभुः चेति –

''परं ब्रह्म परं धाम पवित्रं परमं भवान्।
पुरुषं शाश्वतं दिव्यमादिवमजं विभुम्।।''[67]

नारदपञ्चरात्रे वासुदेवं कृष्णं परब्रह्मत्वेन कथितवान् - 'वासुदेवः परं ब्रह्म परमात्मा'[68]।

अतः सकलश्रुतिस्मृतिवचनादि पर्यालोच्य दृश्यते नराकृति परं ब्रह्म श्रीकृष्ण एव। अतस्तापनी दृढतयोद्घोषितवती - 'परं ब्रह्म गोपालः'[69], 'परं ब्रह्म कृष्णात्मको नित्यानन्दैकरूपः'[70]।

[61] विष्णुपुराणम् – ४/११/२
[62] पद्मपुराणम्, उत्तरखण्डः – ७१/२४९
[63] भागवतमहापुराणम् – ७/१५/६१
[64] तत्रैव – ७/१५/७९
[65] तत्रैव – १०/३/२८
[66] श्रीमद्भगवद्गीता – १४/२९
[67] श्रीमद्भगवद्गीता– १०/१२
[68] नारदपञ्चरात्रम्, चतुर्थभागः – ३/१०
[69] गोपालोत्तरतापनीयोपनिषत् - ९४
[70] तत्रैव - ४४

## संदर्भ


1. *अथर्ववेदीयगोपालतापनीयोपनिषत्* (विश्वेश्वरस्य टीकया तथा बङ्गानुवादेन सहिता). संकलकः तथा प्रकाशकः श्रीमहेशचन्द्रपालः. कलिकाता : सभावकार्यालयः, १८१० (शकाब्दः)।
2. *उपनिषत्संग्रहः*. सम्पादकः पण्डितजगदीशशास्त्री. दिल्ली : मोतिलाल बनारसी दास, २०१७ (सप्तमं पुनर्मुद्रणम्)।
3. कृष्णद्वैपायनवेदव्यासः. *श्रीमद्भगवद्गीता* (शाङ्करभाष्यटीकासहिता). अनुवादकः स्वामिवासुदेवानन्दः. कलिकाता : उद्बोधनकार्यालयः, १९६८ प्रथमप्रकाशः।
4. कृष्णद्वैपायनवेदव्यासः. *ब्रह्मवैवर्तपुराणम्*. अनुवादकस्तथा सम्पादकः पञ्चाननतर्करत्नः. कलिकाता : नवभारत पावलिशार्स, १३९६ (बङ्गाब्दः)।
5. कृष्णद्वैपायनवेदव्यासः. *विष्णुपुराणम्* (श्रीधरस्वामिटीकासमेतम्). प्रकाशकः श्रीविहारीलालसरकारः. कलिकाता : १२९४ (बङ्गाब्दः)।
6. कृष्णद्वैपायनवेदव्यासः. *श्रीमद्भागवतम्* (श्रीधरस्वामिटीकासमेतम्). अनुवादिका अध्यापिका गीता-माइतिः. कलिकाता : उद्बोधनकार्यालयः, १४२५ (बङ्गाब्दः, चतुर्थसंस्करणम्)।
7. *गोपालतापनी* (श्रीविश्वेश्वरकृतटीकया श्रीजीवगोस्वामिकृतटीकया च सहिता). संशोधकः श्रीरासविहारिसाङ्ख्यतीर्थः. प्रकाशकः श्रीरामदेवमिश्रः. मुर्शिदावाद : १३२४ (बङ्गाब्दः, चतुर्थसंस्करणम्)।
8. विद्यारत्नस्वामी. *पञ्चदशी*. अनुवादकः स्वामिबाणेशानन्दः. कलिकाता : उद्बोधनकार्यालयः, २०१८ (पञ्चमपुनर्मुद्रणम्)।
9. *वैष्णव उपनिषत्* (श्री उपनिषद्ब्रह्मयोगिविरचितव्याख्यायुता). सम्पादकः महादेवशास्त्री. मद्रास : अडयार् पुस्तकालयः (थियासोफिकल सोसाइटि), १९२३
10. *श्रीश्रीब्रह्मसंहिता* (पञ्चमाध्यायमात्रम्). सम्पादकः श्रीमद्भक्तिसिद्धान्तसरस्वती-गोस्वामिप्रभुपादः. कलिकाता : गोडीयमिशन्, २०११ (प्रथममुद्रणम्)।
11. *श्रीश्रीनारदपञ्चरात्रम्* (ज्ञानामृतसारसंहिता). बङ्गानुवादकः श्रीरामशास्त्री श्रीनिर्मलानन्दरसस्वती च. कलिकाता : संस्कृत-पुस्तक-भाण्डार, १३५२ (बङ्गाब्दः) प्रथमसंस्करणम्।
12. *श्रीगोपालतापनी* (विश्वेश्वरपण्डितविरचितटीकासहिता). सम्पादकः श्रीहरचन्द्रविद्याभूषणः श्रीविश्वनाथशास्त्री च. कलिकाता : एसियाटिक-सोसाइटि, १८७० (संवत्)।